प्यायमानः, [1]प्यापयमानः, पिप्यासमानः, पाप्यायमानः ;
प्यास्यमानः, प्यापयिष्यमाणः, पिप्यासिष्यमाणः, पाप्यायिष्यमाणः ;
प्याः-प्यौ-प्यः ; — —
[2]प्यानम्-[A]नः, प्यानवान्, प्यापितः, पिप्यासितः, पाप्यायितः-तवान् ;
[3]आप्यायः, [4]पीवा-[B]पीवरी, प्यापः, पिप्यासुः, पाप्यः ;
प्यातव्यम्, प्यापयितव्यम्, पिप्यासितव्यम्, पाप्यायितव्यम् ;
प्यानीयम्, प्यापनीयम्, पिप्यासनीयम्, पाप्यायनीयम् ;
प्येयम्, प्याप्यम्, पिप्यास्यम्, पाप्याय्यम् ;
[5]ईषत्प्यानः-दुष्प्यानः-सुप्यानः ; — —
प्यायमानः, प्याप्यमानः, पिप्यास्यमानः, पाप्याय्यमानः ;
प्यायः, प्यापः, पिप्यासः, पाप्यायः ;
प्यातुम्, प्यापयितुम्, पिप्यासितुम्, पाप्यायितुम् ;
प्यातिः, [6]आप्या, प्यापना, पिप्यासा, पाप्याया ;
प्यानम्, प्यापनम्, पिप्यासनम्, पाप्यायनम् ;
प्यात्वा, प्यापयित्वा, पिप्यासित्वा, पाप्यायित्वा ;
प्रप्याय, प्रप्याप्य, प्रपिप्यासिष्य, प्रपाप्याय्य ;
प्यायम् २, प्यात्वा २, } प्यापम् २, प्यापयित्वा २, } पिप्यासम् २, पिप्यासित्वा २, } पाप्यायम् २; पाप्यायित्वा २. }

---

1. अचित्तवत्कर्तृकत्वे शानच् । चित्तवत्कर्तृकत्वे तु 'अणावकर्मकात्—' (1-3-88) इति ण्यन्ताच्छतैव ।
2. 'संयोगादेरातो धातोर्यण्वतः' (8-2-43) इति निष्ठानत्वे रूपम् ।
3. 'श्याऽऽद्—' (3-1-141) इत्यादिना कर्तरि णप्रत्यये युगागमः ।
4. 'आतो मनिन्—' (3-2-74) इत्यनेन बाहुलकात् क्वनिप्प्रत्यये, 'प्याय्योः सम्प्रसारणं च' (भाष्यम्-3-2-178) इति प्रक्रियासर्वस्वानुसारिभाष्यवाक्येन सम्प्रसारणे च रूपम् । स्त्रियाम्, 'वनो र च' (4-1-7) इति ङीब्रेफौ भवतः ।
5. ईषदाद्युपपदेषु, 'आतो युच्' (3-3-128) इति युच्प्रत्ययः । खलोऽपवादः ।
6. 'आतश्चोपसर्गे' (3-3-106) इत्यङ् ।

A. 'दयस्व मां देव कृपाम्बुशीत प्यानौजसा त्रातजगत्त्रयं त्वाम् ।' धा. का. 2.37.
B. 'जघनमलघुपीवरोरु कृच्छ्रादुरुनिबिरीसनितम्बभारखेदि ।' शि. व. 7.20.

Indologisches Seminar der Universität Bonn